# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर-२०१९

| | | |
|---|---|---|
| कक्षा -आचार्यप्रथमवर्षम् (सत्रम्-१) | प्रश्नपत्रम् – ३ | गुणाः - ७० |
| विषयः - फलितज्यौतिषम् | (EC.- ४.१.२. OLD ) | समयः -८.०० तः ११.०० |
| दिनाङ्कः - ११/१०/२०१९ | सन्दर्भग्रन्थः - सारावली | |

| | | |
|---|---|---|
| | **प्रथमान्वितिः** | |
| **प्रश्नः १** | **अधोलिखितयोः कस्यचित् एकस्य उपरि सान्वयं व्याख्यां करोतु ।** | ०५ |
| (अ) | विधाता लिखिता यासौ ललाटेऽक्षरमालिका ।<br>दैवज्ञस्तां पठेद्व्यक्तं होरानिर्मलचक्षुषा ॥ | |
| (ब) | सौम्ये त्रिकोणसंस्थे लग्नाच्छेषग्रहैर्बलविहीनैः ।<br>द्विगुणास्यपादहस्तो योगेऽस्मिनाहितो भवति गर्भः ॥ | |
| **प्रश्नः २** | **अधोलिखितयोः कस्यचित् एकस्योपरि निबन्धं लिखतु ।** | १० |
| (अ) | अयाधानवशाद् जन्मांधादिज्ञानमाह । | |
| (ब) | ग्रहाणां दीप्ताद्यवस्थावर्णनपूर्वकं तत्फलानि । | |
| | **द्वितीयान्वितिः** | |
| **प्रश्नः ३** | **अधोलिखितयोः कस्यचित् एकस्योपरि सान्वयं व्याख्यां करोतु ।** | ०५ |
| (अ) | चित्रं नवं भृगुसुते च दृढं गुरौच दग्धं कुजे दिनकरे परिपूर्णकाठव्यम् ।<br>चन्द्रे नवं च बहु शिल्पि कृतं बुधे च जीर्णं भवेद् गृहमिहोष्णकरात्मणे च ॥ | |
| (ब) | राशौ होनान्तरं प्राप्य यो यस्मिन् व्याधिमाप्नुयात् ।<br>तच्चास्य होराप्रसवे चन्द्रस्थानं च यद्भवेद् ॥ | |
| **प्रश्नः ४** | **अधोलिखितयोः कस्यचित् एकस्योपरि निबन्धं लिखतु ।** | १० |
| (अ) | चन्द्रकृतकर्णरोगयोगमाह । | |
| (ब) | दुरुधरायोगप्रकारः । | |
| | **तृतीयान्वितिः** | |
| **प्रश्नः ५** | **अधोलिखितयोः कस्यचित् एकस्य उपरि सान्वयं व्याख्यां करोतु ।** | ०५ |
| (अ) | शूद्रोऽथ सूत्रकारश्चक्रधरो वा विपन्नदारधनः ।<br>दुःखार्णवोऽटनपरः सुसङ्गतैरर्कजीवबुधभौ मैः ॥ | |
| (ब) | रविकुजशशिशुक्रैश्चन्द्रभौमज्ञसूर्यै-<br>र्गुरुसितरविमन्दैः शुक्रजीवेन्दुवक्रैः ॥<br>कुज बुध सितचन्द्रैरेभिरेकर्क्षयातै-<br>र्भवति गिरिवनौकास्तायसः सर्ववन्द्यः ॥ | |
| **प्रश्नः ६** | **अधोलिखितयोः कस्यचित् एकस्योपरि निबन्धं लिखतु ।** | १० |
| (अ) | मीनराशिस्थे सूर्यफलमाह । | |
| (ब) | केदारपाशदामिनीवीणायोगानां फलान्याह । | |

| | | |
|---|---|---|
| | **चतुर्थान्वितिः** | |
| **प्रश्नः ७** | **अधोलिखितयोः कस्यचित् एकस्य सान्वयं व्याख्यां करोतु ।** | **०५** |
| (अ) | सौवर्णाङ्गः स्थिरस्वः सहज विरहितः साहसी मानभद्रः ।<br>कामार्तः क्षामजानुः कुनखतनुरकचश्चञ्चलो मानक्तिः ।<br>पद्माभैः पाणिपादैर्विततसुतजनो वर्तुलाकारनेत्रः ।<br>सस्नेहस्तोयभीरुर्ब्रणविकृतशिराः स्त्रीजितोमेष इन्दौ ॥ | |
| (ब) | सत्यवचनं सुखादयं भूपतिसत्कारसत्कृतं मनुजम् ।<br>कुरुते बुधोऽर्कदृष्टो बन्धुजने सुक्षमं कुजभे ॥ | |
| **प्रश्नः ८** | **अधोलिखितयोः कस्यचित् एकस्योपरि निबन्धं लिखतु ।** | **१०** |
| (अ) | बुधराशिस्थिते भार्गवे क्रमेण सूर्यचन्द्रकुजानां दृष्टिफलमाह । | |
| (ब) | गुरुराशिस्थिते भार्गवेक्रमेण बुधगुरुशनीनां दृष्टिफलमाह । | |
| | **संयुक्तान्वितिः** | |
| **प्रश्नः ९** | **अधोलिखितेषु केषाञ्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु ।** | **०५** |
| (१) | सारावलीग्रन्थस्य लेखकः कः ? | |
| (२) | आर्तशब्दस्य अर्थः कः ? | |
| (३) | सारावलीग्रन्थस्य प्रथमोऽध्यायस्य नाम किम् ? | |
| (४) | प्रथमद्रेष्काणे पुरुषस्त्री कः ग्रहः बलिनः भवति ? | |
| (५) | ग्रहाणामवश्या कति विधा ? | |
| (६) | स्वोच्चस्थितग्रहः दीप्तः न वा ? | |
| (७) | पीडितग्रहदशाफलं किम् ? | |
| (८) | शीर्षोदयराशयः के ? | |
| (९) | यदि सर्वे शुभग्रहाः नीचाश्रिताः भवेयुः तदा प्रसवफलं किम् ? | |
| (१०) | बहुदीपयुक्तडन्मकालः कदा भवति ? | |
| (११) | रवीन्दुबुधजीवसितसौरैः (नरः) नृपस्य मन्त्री भवति न वा ? | |
| (१२) | तपस्वीयोगः कदा भवति ? | |
| (१३) | संन्यासीयोग कदा भवति ? | |
| (१४) | कन्याराशिगतभौमस्य फलं किम् ? | |
| (१५) | शुक्रः कस्य राशेः स्वामी ? | |
| | ----०००○---- | |